# UNIVERSITY OF NORTH BENGAL

B.A. Programme 2nd Semester Examination, 2019

## DSC2-SANSKRIT (202)

Time Allotted: 2 Hours Full Marks: 60

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### Unit-I

1. Answer any ***one*** of the following questions: $12\times1 = 12$

(a) Describe after रघुवंश Canto-I, the character of the king दिलीप .

(b) Determine the value of the रघुवंश as a महाकाव्य .

2. Explain any ***one*** of the following: $6\times1 = 6$

(a) मन्दः कवियशः प्रार्थी गमिष्याम्युपहास्यताम्।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः॥

(b) ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव॥

3. Translate into English or Bengali any ***two*** of the following: $3\times2 = 6$

(a) क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥

(b) तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा॥

(c) आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः।
आगमैः सदृशारम्भ आरम्भसदृशोदयः॥

4. Answer any ***six*** questions: $1\times6 = 6$

(a) What is the origin of रघुवंशम् ?

(b) Who has cursed दिलीप and why?

(c) Who was अरुन्धती ?

(d) Write the name of two commentators of रघुवंश.

(e) "वृद्धत्वं जरसा विना"– Why did the speaker say this?

(f) Who was सुदक्षिणा ?

(g) Write the name of 1st Canto of रघुवंश.

(h) "स्वाहयेव हविर्भुजम्"– who is हविर्भुक् ?

## Unit-II

5. Answer any *one* of the following questions: 12×1 = 12

(a) Discuss the Poetic value of the नीतिशतक.

(b) Write a detail note on 'विद्वत्पद्धति' as described in नीतिशतक .

6. Explain any *one* of the following: 6×1 = 6

(a) अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।
ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रञ्जयति॥

(b) स्वायत्तमेकान्तहितं विधात्रा विनिर्मितं छादनमज्ञतायाः।
विशेषतः सर्वविदां समाजे विभूषणं मौनमपण्डितानाम्॥

7. Translate into English or Bengali any *two* of the following: 3×2 = 6

(a) लभेत सिकतासु तैलमपि यत्नतः पीडयन्
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः।
कदाचिदपि पर्यटञ्छशविषाणमासादयेत्
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्॥

(b) शिरः शार्वं स्वर्गात् पशुपतिशिरस्तः क्षितिधरं
महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम्।
अधोऽधो गङ्गेयं पदमुपगता स्तोकमथवा
विवेकभ्रष्टानां भवति विनिपातः शतमुखः॥

(c) येषां न विद्या न तपो न दानं
ज्ञानं न शीलं न गुणो न धर्मः।
ते मर्त्यलोके भुवि भारभूता
मनुष्यरूपेण मृगाश्चरन्ति॥

8. Answer any *six* of the following questions: 1×6 = 6

(a) What is meant by व्याल ?

(b) Who are like friends for travelling abroad?

(c) Who is अल्पज्ञः?

(d) ''ब्रह्मापि नरं न रञ्जयति''– Who is referred to here by 'नरं' ?

(e) Who is the author of नीतिशतक ?

(f) ''शक्यो वारयितुं जलेन हुतभुक्''– What is the meaning of the word हुतभुक् ?

(g) ''दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये''– What is the nature of ब्रह्मन् here?

(h) ''जीर्णमङ्गे सुभाषितम्''– What is the cause of shortness of सुभाषितम् ?

——×——

# UNIVERSITY OF NORTH BENGAL

B.A. Honours 2nd Semester Examination, 2019

## GE2-SANSKRIT

Time Allotted: 2 Hours | Full Marks: 60

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### Unit-I

1. Answer any ***one*** of the following questions: 12×1 = 12

(a) Write an essay on आयुर्वेदशास्त्र in ancient and mediaeval India.

(b) Write a detailed note on importance of व्याकरणशास्त्र in Sanskrit literature.

2. Write short notes on any ***two*** of the following: 6×2 = 12

अमरकोशः; संगीतदामोदरः; ब्रह्मगुप्तः।

3. Answer any ***four*** of the following questions: 3×4 = 12

(a) Name the books written by वराहमिहिर.

(b) Who was the propounder of वास्तुशास्त्र ? Write the name of two books on this शास्त्र.

(c) What are the two categories of architecture? Write the name of the famous architect of second category.

(d) Who was गङ्गादास ? What is his famous book on छन्दःशास्त्र ?

(e) Write the name of two authors and their works in the field of ancient Indian Alchemy.

(f) How many उपवेदs are there in Sanskrit literature? Name them.

### Unit-II

4. Translate from Bengali to Sanskrit any ***two*** of the following: 6×2 = 12

(a) রবীন্দ্রনাথের 'গীতাঞ্জলি' বিভিন্ন ভাষায় অনূদিত হয়েছিল। পণ্ডিত অমরেন্দ্র মোহন সংস্কৃত ভাষায় এটি অনুবাদ করেন।

(b) স্বাধীনতা সকলের কাম্য। পিঞ্জরাবদ্ধ পশুরাও সুখী হয় না এবং তারা মুক্তির জন্য চেষ্টা করে।

(c) গ্রন্থই আমাদের সবচাইতে বড় বন্ধু। আমাদের বন্ধুদের পরিবর্তন বা মৃত্যু হতে পারে, কিন্তু গ্রন্থ সর্বদাই আমাদের সাথে কথা বলে।

## Unit-III

5. Read any ***one*** of the following passages and answer the following questions in Sanskrit. 12×1 = 12

(a) अस्ति काञ्चनपुरनाम्नि नगरे वीरविक्रमो नाम राजा। तस्य धर्माधिकारिणा कश्चिन्नापितो बध्यभूमिं नीयमानः कन्दर्पकेतुनाम्ना परिव्राजकेन साधुद्वितीयेन नायं हन्तव्य इत्युक्त्वा वस्त्राञ्चले धृतः। राजपुरुषा ऊचुः – किमिति नायं बध्यः। स आह – श्रूयताम्, अहं सिंहलद्वीपभूपतेर्जीमूतकेतोः पुत्रः कन्दर्पकेतुर्नाम। एकदा केलिकाननावस्थितेन मया पोतवणिङ्मुखाच्छ्रुतं यदत्र समुद्रमध्ये सर्वालंकारभूषिता लक्ष्मीरिव वीणां वादयन्ती कन्या काचिद् दृश्यत इति।

(i) को नाम कन्दर्पकेतुः ?

(ii) राजा कुत्रासीत् ? तस्य किं नाम ?

(iii) नापितः केन बध्यभूमिं नीयमानः आसीत् ?

(iv) कन्दर्पकेतुना पोतवणिङ्मुखात् किं श्रुतम् ?

(b) अस्ति ब्रह्मारण्ये कर्पूरतिलको नाम हस्ती। तमवलोक्य सर्वे शृगालाश्चिन्तयन्ति स्म–यद्ययं केनाप्युपायेन म्रियते तदास्माकम् एतद्देहेन मासचतुष्टयस्य स्वेच्छया भोजनं भविष्यति। तत्रैकेन वृद्धशृगालेन प्रतिज्ञातम् – "मया बुद्धिप्रभावादस्य मरणं साधयितव्यम्" इति। अनन्तरं स वञ्चकः कर्पूरतिलकसमीपं गत्वा साष्टाङ्गपातं प्रणम्योवाच– देव! दृष्टिप्रसादं कुरु। हस्ती ब्रूते–कस्त्वम् ? कुतः समायातः। सोऽवदत् जम्बुकोऽहम्। सर्वैर्वनवासिभिः पशुभिः मिलित्वा भवत्सकाशं प्रस्थापितः यत् "विना राज्ञावस्थातुं न युक्तं तदत्राटवीराज्येऽभिषेक्तुं भवान् सर्वस्वामिगुणोपेतो निरूपितः।" इति।

(i) कर्पूरतिलकः कुत्र वसति ?

(ii) हस्तिनं दृष्ट्वा शृगालैः किं चिन्तितम् ?

(iii) वृद्धशृगालेन किं प्रतिज्ञातम् ?

(iv) हस्तिनं प्रति वृद्धशृगालेन किम् उक्तम् ?

——×——

# UNIVERSITY OF NORTH BENGAL

B.A. Honours 2nd Semester Examination, 2019

## CC3-SANSKRIT (203)

Time Allotted: 2 Hours | Full Marks: 60

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### विभागः–'क'

1. एकस्य प्रश्नस्य उत्तरं प्रदेयम् – 12×1 = 12

(क) भारतीयसंस्कृतौ साहित्ये च रामायणस्य गुरुत्वम् आलोचनीयम्।

(ख) किं नाम ऐतिहासिककाव्यम् ? संस्कृतभाषया विरचितानाम् ऐतिहासिककाव्यानां विवरणं लिखत।

2. संस्कृतभाषया देवनागरीलिप्या च टिप्पणी कार्या (द्वयोः) – 6×2 = 12

अष्टाङ्ग–आयुर्वेदः; मुद्राराक्षसम्; लीलावती।

3. संक्षिप्तोत्तरं लेखनीयम् (द्वयोः) – 3×2 = 6

(क) 'पञ्चतन्त्रम्' इति ग्रन्थस्य कः रचयिता ? ग्रन्थेऽस्मिन् कति ग्रन्थभेदाः ? नामानि लेखनीयानि।

(ख) जुनागड़शिलालेखस्य कः रचयिता ? अस्य विषयः कः ?

(ग) रचयितुः नामोल्लेखपूर्वकं संस्कृतभाषया विरचितयोः द्वयोः प्रकरणयोः नाम लिखत।

### विभागः–'ख'

4. एकस्य प्रश्नस्य उत्तरं प्रदेयम् – 12×1 = 12

(क) किं नाम संवादसूक्तम् ? ऋग्वेदीयसंवादसूक्तम् आधारीकृत्य नातिदीर्घः प्रबन्धः लिख्यताम्।

(ख) कति वेदाङ्गानि सन्ति ? तेषां स्वरूपं प्रयोजनं च आलोचयत।

5. संस्कृतभाषया देवनागरीलिप्या च टिप्पणी कार्या (द्वयोः) – 6×2 = 12

आचार्यः सायणः; छान्दोग्योपनिषद्; बृहद्देवता।

6. संक्षिप्तोत्तरं प्रदेयम् (द्वयोः) – 3×2 = 6

(क) शतपथब्राह्मणम् कस्मिन् वेदे अन्तर्भवति ? अस्य नामकरणस्य तात्पर्यं किम् ?

(ख) सामवेदस्य मुख्यभागाः कति ? नामानि लेखनीयानि।

(ग) ब्राह्मणग्रन्थस्य प्रतिपाद्यविषयाः कति ? तेषां नामानि लिखत।

——×——

# UNIVERSITY OF NORTH BENGAL

B.A. Honours 2nd Semester Examination, 2019

## CC4-SANSKRIT (204)

Time Allotted: 2 Hours | Full Marks: 60

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### Unit-I

1. एकस्य विभागस्य उत्तरं संस्कृतभाषया देवनागरीलिप्या च प्रदेयम् – 12×1 = 12

क-विभागः

चतुर्णां सूत्राणां व्याख्या कार्या –

कृत्यल्युटो बहुलम्; ऋहलोर्ण्यत्; कालसमयवेलासु तुमुन्; स्त्रीभ्यो ढक्; कन्यायाः कानीन च; तस्मै हितम्।

ख-विभागः

चतुर्णां सूत्राणां व्याख्या कार्या –

कर्मण्यण्; समानकर्तृकयोः पूर्वकाले; स्त्रियां क्तिन्; अत इञ्; तेन प्रोक्तम्; किति च।

2. संस्कृतभाषया देवनागरीलिप्या च ससूत्रं पदसाधनं कुरुत (द्वयोः विभागयोः) – 6×2 = 12

(क) कारकः ; कृतिः।

(ख) शैवः ; शुष्कः।

(ग) सभ्यः ; दानीयः।

3. संस्कृतभाषया देवनागरीलिप्या च परिणतरूपं लेखनीयम् (द्वयोः विभागयोः) – 3×2 = 6

(क) भिद् + क्त; युष्मद् + छ; आ–दा + ल्यप्।

(ख) त्यज् + ण्यत्; गङ्गा + अण्; प्रशस्य + इष्ठन्।

(ग) पी + क्त्वा; क्षत्र + घ; गम् + शतृ।

### Unit-II

4. एकस्योत्तरं प्रदेयम् – 12×1 = 12

(क) कः आसीत् विहारभद्रः ? सः अनन्तवर्माणं प्रति यदुपदिशति तत् सर्वं विश्रुतचरितानुसारं सविशदमालोचयत।

(ख) "बाणोच्छिष्टं जगत् सर्वम्"– उक्तेरस्याः याथार्थ्यं व्याख्येयम्।

5. अधोलिखितेषु द्वयोः वङ्गभाषया आङ्गलभाषया वा अनुवादः करणीयः – 6×2 = 12

(क) अथ सोऽप्याचचक्षे– "देव! मयापि परिभ्रमता विन्ध्याटव्यां कोऽपि कुमारः क्षुधा तृषा च क्लिश्यन्नक्लेशार्हः क्वचित्कूपाभ्याशेऽष्टवर्षदेशीयो दृष्टः।" स च त्रासगदगदमगदत्– "महाभाग! क्लिष्टस्य मे क्रियतामार्थ साहाय्यकम्। अस्य मे प्राणापहारिणीं पिपासां प्रतिकर्तुमुदकमुदञ्चन्निहकूपे कोऽपि निष्कलो ममैकशरणभूतः पतितः। तमलमस्मि नाहमुद्धर्तुम्" इति।

(ख) यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः। अनुज्झित धवलतापि सरागैव भवति यूनां दृष्टिः। अपहरति च वात्येव शुष्कपत्रं समुद्भूतरजोभ्रान्तिरतिदूरमात्मेच्छया यौवनसमये पुरुषं प्रकृतिः। इन्द्रियहरिणहारिणी च सततमतिदूरन्तेयमुपभोगमृगतृष्णिका।

(ग) मनसा देवताध्यारोपणप्रतारणासम्भूतसम्भावनोपहताश्च आन्तः प्रविष्टापरभूजद्वयमिवात्मबाहुयुगलं सम्भावयन्ति। त्वगन्तरिततृतीयलोचनं स्वललाटमाशङ्कन्ते। दर्शनप्रदानमप्यनुग्रहं गणयन्ति, दृष्टिपातमप्युपकारपक्षे स्थापयन्ति, सम्भाषणमपि संविभागमध्ये कुर्वन्ति, आज्ञामपि वरप्रदानं मन्यन्ते, स्पर्शमपि पावनमाकलयन्ति।

6. संस्कृतभाषया देवनागरीलिप्या च संक्षिप्तोत्तरं प्रदेयम् (द्वयोः) – 3×2 = 6

(क) शुकनासोपदेश इति पाठ्यांशः कस्मिन् ग्रन्थे अन्तर्भवति ? ग्रन्थस्यास्य कः रचयिता ? ग्रन्थकारेण विरचितस्य अपरग्रन्थस्य नाम किम् ?

(ख) कति राजविद्याः ? तासां नामानि लेखनीयानि।

(ग) "विरला हि तेषामुपदेष्टारः"–
उद्धृतिरियं कस्मिन् ग्रन्थे लभ्यते ? कस्य उक्तिरियम् ? कं प्रति वक्तुः इयमुक्तिः ?

——×——